CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 284

Title Somavara Vratodyapana vidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 284 Subject: Tantric Ritual

Title: Somavāra vratodyāpanavidhi

Author: Dyutarāja Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 9.9" by 4.4" Extent: 2 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

श्री॥ अथ सोमवारव्रतोद्यापनविधिर्लिख्यते॥ स्कंद उवाच॥ व्रतस्योद्यापनं
कर्म कथं कार्यं च मानवैः॥ को विधिः कानि द्रव्याणि कथयस्व मम प्रभो॥
ईश्वर उवाच॥ शृणु षण्मुख यत्नेन लोकानां हितकाम्यया॥ उद्यापनविधि
चैव कथयामि तवायतः॥ यथा संजायते विश्वंतं भक्तिश्रद्धासमन्वितं॥ सए
वव्रतकालश्च यतो नित्यं हि जीवितं चतुर्दशाब्दं कर्तव्यं सोमवारव्रतं शुभं
॥ श्रावणे कार्त्तिके ज्येष्ठे वैशाखे मार्गशीर्षके॥ संपाद्य सर्वसंभारान्मंडपं
न च कारयेत्॥ सुस्नानश्च शुचिर्भूत्वा शुक्लांबरधरो नरः॥ कामक्रोधाद्य

हुंकारद्वेषपैशून्यवर्जितः॥ वस्त्रैः पुष्पैः समाछन्नं पट्टवस्त्रैश्च शोभितं॥ तन्मध्ये ले
खयेद्दिव्यं लिंगतोभद्रमंडलं॥ अथवा सर्वतोभद्रं मंडपांतः प्रकल्पयेत्॥ शोभोप
शोभासंयुक्तं दीपैः सर्वत्र सोज्वलं॥ आचार्यं वरयेत्तत्र ऋत्विग्भिः सहितः शुचिः॥ शिवरू
पात्मने विप्रा पूज्याश्चंदनपुष्पकैः॥ अनुज्ञातस्ततैर्विप्रैः शिवपूजां समारभेत्॥ रुद्र
मात्मानमोंतेन ब्राह्मणानपि स्तुयेत्॥ अष्टपूर्णं सजलं कुंभं तस्या पश्चिमे विन्यसेत्॥
सौवर्णं राजतं ताम्रं मृन्मयं वापि कारयेत्॥ कुंभोपरि न्यसेद्देवं उमया सहितं शिवं॥
सौवर्णे घटवारौ घे वृषभे संस्थितं शुभं॥ उमा महेश्वरीमूर्तिं पूजयेद्वृषभे स्थितां॥

वस्त्रयुग्मेन संवेष्ट्य बिल्वपत्रैः प्रपूजयेत्॥ स्वगृह्योक्तेन विधिनाऽत्वाग्निस्थापनं तत
नतो होमश्च मंत्रेण त्र्यंबकेण च कारयेत्॥ गौरीर्मिमाय मंत्रेण शतमष्टोत्तरं द्वयं॥
पलाशानां समिद्भिश्च यव व्रीहि तिलाज्यकैः॥ पूर्णाहुतिं ततो दद्यात् रखा स्विष्टकृदादि
कं॥ होमांते चरुं पूज्य सपत्नीकं समाहितः॥ प्रतिमां कुंभसहितामाचार्याय निवेद
येत्॥ शंभो प्रसीद देवेश सर्वलोकेश्वर प्रभो॥ तवरूपप्रदानेन मम संतु मनोरथाः॥
प्रतिमादान मंत्राः॥ यद्भक्त्या देव देवेश मया व्रतमिदं कृतं॥ न्यूनं वा यत्क्रियाहीनं परि
पूर्णं तदस्तु मे॥ भुंजीत सह धर्मात्मा शिष्टैरिष्टैश्च बंधुभिः॥ अनेनैव विधानेन यः कु

व्रतमाचरेत्॥ यंयंचिंतयतेकामंतंतंप्राप्नोतिमानवः॥ इहलोकेसुखीभूत्वाभुक्त्वाभो
गान्यथेप्सितान्॥ ॥इतिश्रीस्कांदेउत्तरराजोक्तं सोमवारव्रतंसंपूर्णं॥ ॥श्रीरस्तु
प्रकारांतरमथास्ति॥